International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(5): 152-153
© 2017 IJSR
www.anantaajournal.com
Received: 11-07-2017
Accepted: 15-08-2017

**अमर नाथ झा**
गवेषक, कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

**Correspondence**
**अमर नाथ झा**
गवेषक, कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

# न्यायादिदर्शनस्य महत्त्वमुपयोगिता च

**अमर नाथ झा**

**सारांश**
भारतीय दर्शनानि वैदिक कालाद् आरभ्य अद्यावधि अविच्छि– न्नरूपेण प्रवहन्ति। सेयं दर्शनधारा पुण्यसलिलायाः भागीरथ्याधारेवान– विच्छन्ना भारते विराजते। पाश्चात्यानां दर्शन हि राजनीतिमूलकतया केवलं भौतिकतत्वानामेवोहापोहं करोति। पश्चात्यदर्शने आचार विचारयोः किमपि सामान्जस्यं नासाद्यते। अपूर्णमेव पाश्चात्यदर्शनम्। भारतीय दर्शनं हि सृष्टेः आरभ्य प्रलयान्तं, धर्मतः आरभ्य मोक्ष पर्यन्तं विस्तृतं विचारं करोति।

**कुटशब्दः** न्यायादिदर्शनस्य महत्त्वमुपयोगिता च, भारतीय दर्शनानि

**प्रस्तावना**
मनुष्यः स्वभावतो मननशीलः प्राणी विद्यते। मत्वा कर्माणि सीव्यतीति शान्योक्तिरपि पूर्वोक्तानुकूला। स हि कोऽहं कस्मादहमित्यादिसमस्याः सततंभावयित्वा ''आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यों निदिध्यासितव्यः'' इति दर्शनबीज मुद्भावितवान्। आत्मदर्शनायैव सर्वाणि दर्शनानि प्रवृत्तानि। आत्मदर्शनं दुःखनिवृत्तयेऽपेक्षितं, दुःखनि– वृत्तिरेव च सर्वैरभीत्सिता। प्राणिमात्रस्य प्रवृत्तिः सुखाय कल्पते। क्षणैकमपि कश्चिद् दुःखं नेच्छति। सांसारिक दुःखादुद्विग्मनसः कतिपये जना ये खलु आत्महत्यायै प्रवर्तमानाः य दृश्यन्ते, तेऽपि सुखमोहादेव तथा चरन्ति। अत्रेदम्बोध्यम् सांख्यशास्त्र सूत्ररम्भे– ''अथत्रिविधदुःखात्यन्तनिवृतिरत्यन्त– पुरुषार्थः''।
इति सूत्रेण शास्त्रप्रवृत्युद्देश्यतया त्रिविधदुःखानामात्यन्तिकीं निवृतिं परमपुरुषार्थत्वेन स्वीकृत्य तदर्थं शास्त्रचर्या समारेभे। तद्व्याख्यानीभूता सांख्यकारिकापि तस्मात् कारणात् सांख्याचार्येण ईश्वरकृष्णेनापि दुःखत्रयाभिधातादित्यादिना एव श्रीगणेशायिता।
भारते दर्शनस्योदये वेदकालएवाजायत। ऋग्वेदे प्रजापतिः परमेष्ठी जगतो मूलतत्त्वं मीमांसमानः प्राप्यते। स हि आनीदवातम्, इत्यादिमन्त्रेषु तदेव तत्वं विमृशन् दृश्यते। अपरोऽपि संवनन आङ्गिरसो नामर्षिः ''सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्'' इत्यादिमन्त्रैस्तस्यैव तत्वस्यावेषणाय लोकान् प्रेरयन् प्रतिभातिं अनयोः ऋष्योश्चिन्ता धारयोर्द्वयी दिशा–प्रथमा चिन्तनप्रवृतिः, द्वितीया तर्कप्रवृतिः। इमे द्वे अपि मिलित्वा दर्शनान्यङ्कुरयितुं प्राभवताम्।
वेदसंहितायामङ्कुरितस्य दर्शनद्रुमस्य उपनिषत्काले पल्लवितत्वं जातम्। ''तत्वमसि'' इति मन्त्रेण तदेव तत्वं प्रकट् प्रतिपादितम्। तद– न्तरं सूत्रकाले दर्शनद्रुमस्य शाखा विभक्ताः।
सोऽयं दर्शनद्रुमः शाखा भेदेन बहुधा विभक्तः। तत्र स्थूलरूपेण प्रथमं द्वौ भागौ–वैदिकानि दर्शनानि अवैदिकानि च दर्शनानि। अवैदिकानि दर्शनानि नास्तिक दर्शनपदेन व्यवह्रियन्ते वैदिकानि च आस्तिक पदेन व्यवह्रियन्ते। तत्र अवैदिकदर्शनानि–चार्वाकदर्शनम्, बौद्धदर्शनम्, जैनदर्शनन्च, वैदिकदर्शनानि च न्यायदर्शनम्, वैशेषिक– दर्शनम्, सांख्यदर्शनम्, योगदर्शनम्, मीमांसादर्शनम्, वेदान्तदर्शनन्च।
चार्वाकदर्शनम्–''चारूवाक्'' इति निर्वचनं चार्वाकशब्दस्य। बृहस्पतिप्रणीतमिदं दर्शनम्। इमे चार्वाकाः परलोकं न मन्यन्ते, शरीर– मेवात्मानं स्वीकुर्वन्ति। इदमेव दर्शनं लोके बाहुल्येन प्रचरितत्वात्, लोके विस्तृतत्वाच्च लोकायतदर्शननाम्नाऽपि व्यवहृतम्। बुद्धिवाद एवामी आस्थाभाजः वितण्डैवचैषां कथासाधनम्। तथा चोक्तं जयन्त भट्टेन नहि लोकायते किन्चित् कर्तव्यमुपदिश्यते। वैतण्डिककथैवासौ न पुनः कश्चिदागमः। बौद्धदर्शनम् :– जैनदर्शनादुत्तरकाले प्रचरितमभवत्। बौद्धदर्शन ग्रन्थेषु जैनानामन्तिमतीर्थङ्करस्य नाटपुत्रस्य नाम्मोल्लेखः सिद्धान्तालोचनं च दृश्यते। जैनग्रन्थेषु बौद्ध दर्शन विषयकः कोऽपि तादृश उल्लेखो न विद्यते अतो बौद्धदर्शनस्य जैनदर्शनोत्तरकालिकत्वं प्रतीयते। बौद्धदर्शनस्य भागद्वयं धार्मिको भागः दार्शनिकश्च भागश्च। तत्र धार्मिकभागे आध्यात्मिकतत्ववर्णनम् आचार निरूपणं च प्रपञ्चितम्, दार्शनिकभागो तु तार्किक दृष्ट्या बौद्धसिद्धान्तस्य सूक्ष्मं विवेचनम् प्रस्तुतम्।

**वैशेषिक दर्शनम् :** सकलदर्शनापेक्षया वैशेषिकदर्शनं प्राचीनम्। एतत्प्रणेता कणादः कश्यपवंशोत्पन्नतया काश्यप शब्दनोक्तः। अयमेव मुनिः उलूक इत्यप्युक्तः –

विरूद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत्।

**न्यायदर्शनम्:** अतिप्राचीनं न्याय शास्त्रम्। अस्य शास्त्रस्य प्रवर्त्तकः "सूत्रकारो गौतमः 500 ई0 पू0 समयेऽजयत। तेन सूत्रणि प्रणीतानि, षोडश– पदार्थाश्चाभ्युपगताः प्रमाणप्रमेयाद्याः। गौतमप्रवर्तितं न्यायशास्त्रं पदार्थमीमांसाशास्त्रम्।

**सांख्य दर्शनम्:** सांख्यदर्शनस्याद्य आचार्यः कपिलः उपनिषत्कालिकः ऋषिः। तत्प्रणीतं सांख्य दर्शनं सम्यक्तया न प्राप्यते। ईश्वरकृष्णेन कारिकां प्रणीय शास्त्रमिदं पुनः सजीवतां गमितम्।

**योग दर्शनम्:** योगः प्राचीन इत्यत्र नास्ति कस्यापिवैमत्यम्। योगक्रिया नाना– सिद्धीनां जननीत्यत्रपि नास्ति विवादः। योगद्वारैव प्रागृषयः प्रतिभानैर्म– ल्यद्वाराऽतीतानागत व्यवहितानामपि प्रत्यक्षे प्रभवन्ति स्म। योगदर्शनस्य प्रवर्तकः –महर्षि पतञ्जलिः विद्यते।

**मीमांसादर्शनम्:** मीमांसायाश्चर्चा वेदस्य संहितायामुपनिषदि ब्राह्मणग्रन्थेषु च प्राप्यते। सोऽयं वेदे प्रयुज्यमानो मीमांसाशब्दो विचारार्थः। कैषीतकि ब्राह्मणे "उदिते होतव्यमनुदिते होतव्यमिति मीमांसन्ते" एव विधा उल्लेखाः विद्यन्ते। समीक्षापद्धतिरियं विचारनाम्नाऽपि प्रसिद्धा वर्तते। न्यायशब्दोऽप्यत्रर्थे, प्रयुज्यते जैमिनीयन्यायमालामीमांसान्याय प्रकाशादौ।
किं मीमांसायाः प्रयोजनमित्यस्योत्तरमाह कुमारिल भट्टः श्लोक– वार्तिके– "धर्मारव्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् इति। बादरायणेन कर्मफल दातेश्वरो मन्यते, परन्तु जैमिनिना मीमांसायां कर्मण एव फलदातृत्वंस्वजन्यापूर्व द्वारा प्रदर्शितम्। यज्ञाः समाप्ताः, फलं च कालान्तरभावि, तत्कथं यागाः फलं दद्युरतोऽपूर्वो नाम कोऽप्यतिशयः स जायते कर्मभ्य इति स एव फलं जनयतीति मीमांसाशास्त्रशयः, भाट्टमतस्य प्रवर्त्तकः कुमारिलः सप्तमशतकोदभवास्ति। अनेन बौद्धाक्षेपेभ्यो मीमांसाशास्त्रस्य रक्षा कृता। गुरूमतस्थापकः प्रभाकरः प्रसिद्धस्य कुमारिलस्य शिष्यः प्रतिभा प्रकर्षप्रसन्नेन गुरूणा गुरूरिप्युपाधिना सत्कृतस्तन्नाम्नैवाप्रथत। मुरारिमतस्य पोषकः कोऽपि ग्रन्थो नावाप्यते। केवलं ग्रन्थेषु तन्मतस्योल्लेख एव तत्सद्भावं प्रकटयति। "मुरारे स्तृतीयाः पन्थाः" इति मिथिलायां प्रसिद्धयति।

**वेदान्तदर्शनम्:** वेदान्तो वेदस्य अन्तः अवसान भागः इति विग्रहेण उपनिषद् इत्युच्यते। वेदान्तो नाम उपनिषत्प्रमाणमिति वेदान्तसागरे उक्तम्। उपनिषद् एव प्राचीनैर्वेदान्तशब्देनोक्ताः। उपनिषदोऽनेकाः तासु क्वचिदापाततो। विरोधोऽपि प्रतिभासते। तस्यैव विरोधस्य दूरी–करणाय व्यासेन ब्रह्मसूत्रणि रचितानि। एतानि सूत्रणि पाणिनेरपि प्राचीनानि, यतः पाणिनिस्तानि– "पाराशर्यशिलालिभ्यं भिक्षुनटसूत्रयोः" इत्यत्र सूत्रे भिक्षुसूत्रणि इति पदेन सस्मार।

**निष्कर्षः**
दर्शनशास्त्रस्य वैशिष्ट्य निरूपणक्रमेणमया बहुधा जनेषु प्रवादोऽस्ति इति श्रुतम्– यद् भारतीयवैदिकानि षड्दर्शनानि परस्परं विरून्धन्ति। इतीयं धारणा निर्मलैवास्ति। यथाहि लोके विविधानि जीवनसाधनानि तथैव शास्त्रण्यपि विविधजन रूचि वैचित्र्यात् भिन्नानि। तात्विकज्ञाने जाते सति तु आत्मा इत्येक एव पदार्थः शिष्यते। तदेव सत्यम्। द्व्यतिरिक्तं निखिलं चरात्मकमेतत्प्रपंचं भ्रान्तिकरमेव स्वप्नमिव, इन्द्रजालिकमिव वा, तथाऽपि अस्य व्यावरिकीं सत्ता मधिकृत्य भगवतोक्तम्– नासतो विद्यते भावो नाभावो विद्यते सतः। अस्मिन् प्रसंगे वाक्य प्रदीपकारो कथ्यति यत्–

अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

भारतीय दर्शनिकानां मध्ये केचित् निरीश्वराः, केचित् सेश्वराः। चार्वाकयते ईश्वरो नास्त्येव, प्रत्यक्ष प्रमाणेन सिद्धय भावात्, बौद्धा अपि सर्वज्ञबुद्धमुनिव्यतिरिक्तमीश्वरं नाङ्गीकुर्वन्ति। मीमासकानां मते कर्मैव फलं ददाति, न तु तदिरिक्त ईश्वरो नाम कश्चित्। न्यायवैशेषिक– प्रस्थानेऽपि जे खलु प्राचीनाचार्य्याः कणादगौतमादयः सूत्रकाराः, तेषां नये क्षित्यंकुरादेः कर्तृरूपस्य कस्यचिद् ईश्वरस्य प्रयोजनम् अस्ति नवेति महती विप्रतिपत्तिर्दृश्यते, सूत्रकृद्भिः स्पष्टतया अनुलेखात्। सर्वेष्वपि वैदिक दर्शनेषु ईश्वसिद्धिर्विहिताऽस्ति। क्वापि नहि तस्य खण्डनम्। उपर्युक्त विवेचनस्य निष्कर्ष क्रमे प्राप्यते यत् सर्वदर्शनेषु न्यायादि– दर्शनस्य महत्त्वमुपयोगिता च अधिको विद्यते।

**संदर्भाः**

1. सां0 सू0–01/01
2. संस्कृत दिग्दर्शिका, डॉ. अनिल कुमार झा, हंस प्रकाशन, जयपुरतः 2000
3. वैदिक कोषः हंस राज एवं भगवदत्तः, राष्ट्रिय संस्कृत संस्थान, दिल्लीतः, 1992
4. रामानुज सिद्धान्त सारः वरदाचार्य, दिल्लीतः 1120
5. भारतीय दर्शन, जगदीश चन्द्र मिश्र, चौखम्बा विद्या भवन, वाराणसीतः, 2005